भस्मस्नानं सप्तविधस्नानान्तर्गताग्नेयस्नानम्। यथा,—

"आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम्।"

इति यामलः॥

शिवपूजायां ललाटे तस्य धारणमावश्यकम्। यथा,—

"विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः॥"

इत्याह्निकतत्त्वम्॥

तेन कांस्यशुद्धिर्यथा,—

"अम्भसा हेमरूप्यायः कांस्यं शुध्यति भस्मना।
अम्लैस्ताम्रञ्च रैत्यञ्च पुनःपाकेन मृण्मयम्॥"

इति शुद्धितत्त्वम्॥*॥

अश्मरीविकारः। यथा,—

"शर्करासिकतामेहो भस्माख्योऽश्मरीवैकृतम्।
अश्मर्याः शर्करा ज्ञेया तुल्यव्यञ्जनवेदना॥"

इति सुश्रुते निदानस्थाने अश्मरीनिदानम्॥

भस्मकं, क्ली, (भस्म + संज्ञायां कन्।) रोगभेदः। भस्मकीट इति ख्यातः। विड़ङ्गः। (यथास्य पर्य्यायः।

"जन्तुघ्नं भस्मकं रेणुः क्रिमिघ्नं चित्रतण्डुलम्।
क्रिमिघ्नन्तु विड़ङ्गञ्च गर्द्दभं तच्च केवलम्॥"

इति वैद्यकरत्नमालायाम्॥) कलधौतम्। इति मेदिनी। के, १३३॥*॥

भस्मकस्य निदानसंप्राप्तिपूर्ब्बकं लक्षणमाह।

"कट्वादिरूक्षान्नभुजां नराणां
क्षीणे कफे मारुतपित्तवृद्धौ।
अतिप्रवृद्धः पवनान्वितोऽग्नि-
र्भुक्तं क्षणाद्भस्म करोति यस्मात्।
तस्मादसौ भस्मकसंज्ञकोऽभू-
दुपेक्षितोऽयं पचते च धातून्॥"

भस्मकस्य सोपद्रवमरिष्टमाह।

"तृट्स्वेददाहमूर्च्छादीन् कृत्वैवात्यग्निसम्भवान्।
पक्वान्नमाशु धात्वादीन् स क्षिप्रं नाशयेद्-
ध्रुवम्॥"

इति भावप्रकाशः॥

(अत्र तीक्ष्णाग्निव्याख्याने विजयेनोक्तम्। तीक्ष्णपदेन भस्मकस्यावरोधः। अत्यन्ततीक्ष्णाग्निरेव हि भस्मकमित्युच्यते॥ यदुक्तञ्चरके चिकित्सास्थाने ऊनविंशेऽध्याये। भस्मकचिकित्सामाह।

"नरे क्षीणकफे पित्तं कुपितं मारुतानुगम्।
स्वोष्मणा पावकस्थाने बलमग्नेः प्रयच्छति॥
तथा लब्धबलो देहे विरूक्षे सानिलोऽनलः।
परिभूय पचत्यन्नं तैक्ष्ण्यादाशु मुहुर्मुहुः॥
पक्त्वान्नं सततं धातून् शोणितादीन् पचत्यपि।
ततो दौर्ब्बल्यमातङ्कान् मृत्युञ्चोपनयेन्नरम्॥
भुक्तेऽन्ने लभते शान्तिं जीर्णमात्रे प्रताम्यति॥"

"समत्वम्ग्नि गुरुस्निग्धशीतमधुरविज्वलैः॥
अन्नपानैर्नयेच्छान्तिं दीप्तमग्निमिवाम्बुभिः।
मुहुर्मुहुरजीर्णेऽपि भोज्यान्यस्योपहारयेत्॥
निरिन्धनोऽन्तरं लब्ध्वा यथैनं न विपादयेत्।
पायसं कृशरं स्निग्धं पैष्टिकं गुड़वैकृतम्॥
अद्यात्तथौदकानूपपिशितानि घृतानि च।
मत्स्यान् विशेषतः स्निग्धान् स्थिरतोयचरां-
स्तथा॥
आविकं सघृतं मांसमद्यादत्यग्निनाशनम्।"

"पिबेत् शीताम्बुना सर्पिर्मधूच्छिष्टेन वा युतम्।
गोधूमचूर्णं पयसा ससर्पिष्कं पिबेन्नरः॥
आनूपरससिद्धान् वा व्रीन् स्नेहांस्तैलवर्ज्जितान्।
गोधूमचूर्णमन्थं वा वधयित्वा शिरां पिबेत्॥"

"श्यामा त्रिवृद्विपक्वं वा पयो दद्याद्विरेचनम्।
असकृत् पित्तशान्त्यर्थं पायसप्रतिभोजनम्॥
यत्किञ्चिन्मधुरं मेध्यं श्लेष्मलं गुरुभोजनम्।
तदत्यग्निहितं सर्व्वं भुक्त्वा प्रस्वपनं दिवा॥
कफे वृद्धे जिते पित्ते मारुते चानलः समः।
समधातोः पचत्यन्नं पुष्ट्यायुर्बलवृद्धये॥")

भस्मकारः, पुं, (भस्म करोतीति। कृ + "कर्म्मण्यण्।" ३।२।१। इति अण्।) रजकः। इति शब्दमाला॥

भस्मकूटः, पुं, कामरूपस्थपर्व्वतभेदः। यथा,—

"नन्दनात् पूर्व्वभागे तु भस्मकूटो महागिरिः।
यत्र तिष्ठति भूतेशो महादेवो वृषध्वजः॥"

इति कालिकापुराणे ८१ अध्यायः॥

भस्मगन्धा, स्त्री, (भस्मन इव गन्धो यस्याः।) रेणुका। इति भावप्रकाशः॥

भस्मगन्धिका, स्त्री, (भस्मगन्धोऽस्त्यस्या इति। भस्मगन्ध + "अत इनिठनौ।" ५।२।११५। इति ठन्। टाप्।) रेणुकाख्यगन्धद्रव्यम्। इति जटाधरः॥

भस्मगन्धिनी, स्त्री, (भस्मन इव बाहुल्येन गन्धोऽस्त्यस्या इति। भस्मगन्ध + इनिः। ङीप्।) रेणुकाख्यगन्धद्रव्यम्। इत्यमरः।२।४।१२०॥

भस्मगर्भः, पुं, (भस्म गर्भेऽस्य।) तिनिशवृक्षः। इति राजनिर्घण्टः॥ (विवरणमस्य तिनिशशब्दे ज्ञातव्यम्॥)

भस्मगर्भा, स्त्री, (भस्म गर्भेऽस्या इति। टाप्।) कपिलशिंशपा। इत्यमरः।२।४।६३॥ (अस्याः पर्य्यायो यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे।

"शिंशपा पिच्छिला श्यामा कृष्णसारा च सा
गुरुः।
कपिला सैव मुनिभिर्भस्मगर्भेति कीर्त्तिता॥")

रेणुकानामगन्धद्रव्यम्। इति जटाधरः॥

भस्मतूलं, क्ली, (भस्म तूलति तूलयति वेति। तूल + क।) ग्रामकूटः। पांशुवर्षणम्। हिमम्। इति मेदिनी। ले, १६८॥

भस्मरोहा, स्त्री, (भस्मनि रोहति इति। रुह् + अच्। टाप्।) दग्धावृक्षः। इति राजनिर्घण्टः॥

भस्मवेधकः, पुं, (भस्म इव वेधकः।) कर्पूरः। इति शब्दरत्नावली॥

भस्माचलः, पुं, कामरूपस्थपर्व्वतभेदः। यथा,—

"सर्व्वतीर्थजले स्नात्वा स्पृष्ट्वा चक्रं सवा-
सवम्।
मणिकर्णेश्वरं दृष्ट्वा मुक्तिर्भस्माचलं गते॥"

इति श्रीकालिकापुराणे ८१ अध्यायः॥

भस्माह्वयः, पुं, (भस्म आह्वयते स्पर्द्धते इति। आ + ह्वे + बाहुलकात् शः।) कर्पूरः। इति त्रिकाण्डशेषः॥ (विषयोऽस्य कर्पूरशब्दे ज्ञातव्यः॥)

भा, ल य दीप्तौ। इति कविकल्पद्रुमः॥ (अदा०-पर०-अक०-अनिट्।) ल, भाति। य, भा। इति दुर्गादासः॥

भा, स्त्री, (भा दीप्तौ + "षिद्भिदादिभ्योऽङ्।" ३।३।१०४। इत्यङ्। टाप्।) प्रभा। दीप्तिः। इत्यमरः।१।४।३४॥ (यथा, वाजसनेयसंहितायाम्। ३०।१२।

"भायै दार्व्वाहारमिति॥")

भाः, [स्] पुं, (भासते इति। भास दीप्तौ + "भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप्।" ३।२।१७७। इति क्विप्।) सूर्य्यः। इति त्रिकाण्डशेषः॥ (स्त्री, दीप्तिः। इत्यमरः।१।४।३४॥ यथा, ऋग्वेदे। १।४६।१०।

"अभूदु भा उ अंशवे हिरण्यं प्रति सूर्य्यः॥")

भाकुटः, पुं, (भया दीप्त्या कुटतीति। कुट + क।) मत्स्यविशेषः। भेकटी इति भाषा॥ अस्य गुणाः। मधुरत्वम्। शीतत्वम्। वृष्यत्वम्। श्लेष्मकारित्वम्। गुरुत्वञ्च। इति राजवल्लभः॥

भाकूटः, पुं, (भायुक्ताः कूटाः शिखराणि यस्य।) पर्व्वतभेदः। मत्स्यभेदः। इति मेदिनी। टे, ५३॥

भाकोषः, पुं, (भानां दीप्तीनां कोष इव।) सूर्य्यः। इति त्रिकाण्डशेषः॥

भाक्तं, त्रि, (भक्तेः गौण्यावृत्तेरागतमिति। भक्ति + अण्।) पारिभाषिकम्। गौणम्। लाक्षणिकम्। औपचारिकम्। यथा। "नन्वेवं परत्र सप्तमे मासि क्रियमाणस्य कथं षाण्मासिकत्वम्। इति चेद्भाक्तम्।" इति तिथ्यादितत्त्वम्॥ (भक्तस्येदमिति तस्येदमित्यण्।) भक्तसम्बन्धिनि च॥ (भक्तमस्मै दीयते नियुक्तमिति। भक्त + "भक्तादणन्यतरस्याम्।" ४।४।६८। इत्यण्। अन्नेन पोष्ये च॥)

भाक्तिकः, त्रि, (भक्तमस्मै नियुक्तं दीयते इति। भक्त + "भक्तादणन्यतरस्याम्।" ४।४।६८। इति पक्षे ठक्।) अन्नेन पोष्यः। भक्तमस्मै दीयते। इति सिद्धान्तकौमुदी॥

भागः, पुं, (भज्यते इति। भज भागसेवयोः + कर्म्मणि घञ्।) अंशः। इत्यमरः।२।६।८६॥ रूप्यार्द्धकः। भाग्यम्। एकदेशः। इति शब्दरत्नावली॥ राशेस्त्रिंशभागैकभागः। यथा,—

"त्रिंशांशकस्तथा राशेर्भाग इत्यभिधीयते॥"

इति तिथ्यादितत्त्वधृतविष्णुधर्म्मोत्तरवचनम्॥ (भज + भावे घञ्। भजनम्। भगानामैश्वर्य्याणां समूहः इति अण्। ऐश्वर्य्यसमूहः॥)

भागधेयं, क्ली, (भाग एव। भाग + "भागरूपनामभ्यो धेयः।" इति धेयप्रत्ययः। अभिधानान्नपुंसकत्वम्।) भाग्यम्। इत्यमरः।३।४।२८॥